॥ वायुवादार्थप्रारंभः ॥ पत्राणी १० समग्र

ग्रंथसंख्या २००

1

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

॥श्रीगणेशाय नमः॥ ॥वायुत्वं नाम सामान्यं तद्धि न तत्र दृष्टिव्यादिभेदे च स्पार्शनप्रत्यक्ष
मेव प्रमाणं। द्रव्यस्पार्शनप्रयोजकयोर्महत्त्वविशेषोद्भूतस्पर्शयोर्वायावपि सत्त्वेन तत्स्पर्शग्रह
काले तद्ग्रहस्य दुर्वारत्वात्। घटं स्पृशामि इत्यादिवत् वायुं स्पृशामीत्यनुभवाच्च। वा
योः स्पर्श एव गृह्यते तेन वायुरनुमीयते प्राचां। स्पर्शेनैव वायुविशेष्यकः शीतो वा
युरित्यादौ प्रत्ययः पुनरुपनयवशान्मनसैवेतत्र च स्पर्शसाक्षात्कारग्रहात्तस्य स्पार्श
नत्वस्यारोप इति वाच्यं। एवं हि स्फटिके लौहित्यनायामानाभावात्। बाधकं विना प्रतीतेरा
रोपत्वायोगाच्च। इतरथा घटेऽपि न स्पार्शनं स्यात्। तत्राप्येवं कुसृष्टेर्वक्तुं शक्यत्वात्। अ
पि च वायुरित्याकारा निरवच्छिन्नवायुत्ववृत्तिप्रकारताप्रतीतिरप्रसिद्धा। न चेदमनुमा
दिनापि उपपादयितुं शक्यते। वायुरित्याकारस्य ग्रहस्य क्वचिदप्यभावेन तादृशा
व्याद्याद्यग्रहाभावात्। न चाकाशपिशाचादिस्पार्शनतापत्तिरुद्भूतस्पर्श।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्यैवोद्भूतरूपस्यापि द्रव्यस्य स्पार्शनहेतुत्वं कल्प्यते। विनिगमकाभावादिति नीरूप
स्य वा योग्यस्पार्शनत्वं संभवति। सोऽयं नीरूपस्यापि वायोरनुद्भूतरूपस्यापि निदा
घोष्मादेः स्पार्शनप्रत्यक्षानुभवस्य उद्भूतरूपाया अपि मल्यां हि ग्रेभोयाः स्पार्शन
नाग्रहस्य विनिगमनाभावादिति मीमांसकाः॥ ॥अत्र प्राचो नैयायिकाः॥ चा
धूमादेश्चाक्षुषतोपपत्तये द्रव्यचाक्षुषस्योद्भूतरूपजन्यत्वमुपेयं। तच्च द्रव्यचा
क्षुषत्वेनावच्छिद्यते। किन्तु बहिरिन्द्रियजन्यद्रव्यसाक्षात्कारत्वेन स्पर्शवदिन्द्रिय
2 जन्यद्रव्यसाक्षात्कारत्वेन मानसेतरद्रव्यसाक्षात्कारत्वेन वा समतिबाधके सामान्यतः प्रमा
णपक्षपातादिति नायं प्रत्यक्षो वायुरत एव कुस्तृष्टि कल्पना प्रिप्रामाणिकी। वायु
रिति प्रतीतिस्तु न शुद्धां जातिमवगाहते किन्तु स्पर्शसमानाधिकरणरूपां समा
नाधिकरणजातत्वेन स्पर्शविशेषा [illegible] नावच्छेदकतया वा अवगाहते। वा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

२

नापुवासर्य

पृथिव्याद्यन्यद्रव्यत्वमेववस्तुतस्तत्प्रमेयत्वादिसाकारिकानुप्रमेयत्वेनवायुत्वप्रका
रकानुभवात्।प्रमेयत्वाद्येतद्बोधकविरहेणवायुरितिस्मृतिः।फलबलेनकल्पनी
या।इत्थंचमनइत्यादिरप्युपपद्यतेतरामनुपपद्यतेतमांच।दृष्टद्रव्यत्वादीनाम
पिद्रव्यत्वइत्याकारकानुभूतिःअननुभवस्यत्वोःसमानप्रकारतयैवहेतुहेतु
मद्भावोनतुसमानाकारतयापिउद्बोधकवशादेवातिप्रसंगभयात्।प्रमेयादिवा
च्यस्पर्शादिमत्त्वग्रहाद्वानुमितिःप्रादुर्भवतिप्रमेयत्वादिकमपहायकेवलंवायुत्वा
दिकंक्वचिदवगाहते।परामर्शानुमित्योर्विशेष्यविशेषणहेतुहेतुमद्भावात्।इत्थंकेचित्
त्वाक्षितिः।कश्चिदिजन्यायादौकृत्यादिगतनित्यत्वस्यपरामर्शविषयादधिकस्य २
भानवत्।क्वचिन्न्यूनस्यापिभानेक्षतिविरहात्।इतिवदंति।तन्न।द्रव्यत्वाच्छि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

षत्वापेक्षयागुरूणामुक्तधर्माणांमवच्छेदकतानुपपत्तेः। सामान्येप्रमाणप
क्षपातइतिमंत्रपावस्यापिसएवावषेषायत्रविशेषापेक्षयासामान्येनगोरथाव
का२। किंचबाधादेःप्रत्यक्षानाबलेनसामान्येनव्यभिचारग्रहाद्विशेषस्यावच्छे
दकताग्रहेयुक्तः तदुक्तंपरित्यज्यचनिश्चिनाव्यभिचारकंरूपंगृह्यमाणव्यभि
चारकेणरूपेणकारणताकल्पनानुदयात्इति। एतेनजन्यद्रव्यसाक्षात्कार
त्वेननिसात्यस्यवृत्तिधर्मेणकार्यताभ्युपगमेद्रव्यसाक्षात्कारत्वेनवारूपज
3 न्यतावच्छेदकाद्यायुरात्माचनप्रत्यक्षएवइतिकेषांमतमपिनिरस्तं। अपि
चैवमुद्भूतस्पर्शजन्यतापितत्रसामान्येनैवावच्छिद्यतामितिप्रभायाश्चाक्षुषी
स्यात्। चाक्षुषाप्रभयारूपमेवगृह्यतेनेनचप्रभानुमीयते। स्पर्शनेवाप्रभावि
शेष्यकस्तमनसोपनयवशादेवप्रत्ययस्तत्रचरूपाध्यक्षेगृह्यमाणस्यचा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

क्षुषत्वस्यारोप इत्यपि कुसृष्टिः कल्प्यते। अथ प्रमाया अतीन्द्रियत्वे दूराच्चल
ति पक्षिकीटादौ चलतीति प्रत्ययो न स्यात् तन्निष्ठस्य प्रत्यक्षतः संभवति। दूरत्वेन
प्रतिबंधात्। चलेन साक्षात्करोमीत्यननुभवाच्च। किंतु पूर्वोत्तरदेशीविभागसं
योगलिंगकानुमानात्। न चोत्तरपूर्वदेशयोः प्रभामंडलात्मकयोरतीन्द्रियत्वे
न तत्संयोगविभागधीः प्रत्यक्षतः संभवति। नापि पूर्वदेशानुपलम्भत्वे सत्युत्तर
पूर्वदेशयोः मानत्वरूपलिंगात्। पूर्वोत्तरदेशयोरतीन्द्रियत्वेन तद्वृत्तितद्धे
तोर्ग्रहाभावात्। अतश्चलनलिंगपूर्वापरदेशसंयोगविभागग्रहणा
र्थं प्रमाया ऐन्द्रियकत्वं वाच्यमिति चेत्। सोऽयं वायुर्वातीति प्रत्ययो न
स्यादिति प्रकृतमतेऽभ्यापि तुल्योऽनुयोगः। वस्तुतस्तत्र पक्षिकांडादौ २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रात्यक्षिक एव बलेन प्रत्ययः। अननुगतस्यैव दूरत्वस्य प्रतिबंधकतायाः कल्प
नावकल्प्य नैयानतत्तदप्रतिबंधात्। साक्षात्कारत्वमेव चलनेनानुगच्छते दोष
दिति। अथैकपक्षिणो नैकपक्षिण इत्यादि बुद्धेः प्रभामंडलात्मकानां ज्ञाना
अनौन्द्रियत्वेनाप्यदात् कोगतिरिति चेत् कोगतिरिदानीं घट इत्यादिप्रत्यय
नांतत्रोपनयवशात् बुद्धिरिति चेत् अत्रापि तथेति को दोषः। अथ तनुद्दत स
न्निजन्यतापि तत्सामान्यधर्मेण। मास्तां नच प्रभाया अपि प्रत्यक्षत्वमेवि
नव्यसरणिरिति चेत् सर्वमिदमस्तु के सामान्येपक्षपातसंभव एव शोभते। न
चायं न नामतः समुन्मूलितत्वात्। तस्मादुद्भूतरूपजन्यतावच्छेदकस्पार्श
नत्वेनावच्छिद्यते लाघवादिति। चक्षुषा प्रभायाः त्वचा चवाय्वादेः साक्षात्कारो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

निरवयव इति। अथैवं वाय्वादिगतसंख्यादीनामपि ग्रहः स्यात्। योग्यद्रव्य
मात्रसमवेतत्वेनैव संख्यादेर्योग्यतेति चेत्। केयं योग्यतानोमाचाक्षु
षमहदुद्भूतरूपवत्त्वस्पार्शनमहत्वविशेषवदुद्भूतस्पर्शवत्त्वमिति चेत्
तवापि तर्हि तद्ग्रहे दुर्वारः। महत्त्वेचैवं महत्वविशेषोद्भूतरूपस्पर्शवि
शेषवत्त्वं तथेति चेत्। तर्हि वाय्वादौ तदभावेन तद्गतसंख्यादेरभानं यद्वा
द्रव्यत्वमेव [illegible] मपि किमुक्तमायुष्मता क्वचिच्चाक्षुषत्वं क्वचि
त्स्पार्शनं द्रव्यग्रहे संख्यादेश्चाक्षुषादिसमवेतत्वस्य विशिष्टस्या
भावात्। वस्तुतो वाय्वादेः संख्यादिकं तत्र एको नाम नाभ्युपैति। स्पर्शाश्रयो
त्वमिति चेत्। न। स्पर्शस्य गुरुसमवायत्वं संप्रति [illegible] उपपत्तेः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

संख्यादेरन्यत्रचमहत्त्वस्यवापुनारीरसयोगस्यचग्रहणात्क्वचिदग्रहस्यदोषवशा.दु
पपत्तेः एतेनत्वक्स्तकृद्ध्यग्रहणादुत्तरमेवपरिमाणादिग्रहः लाघवेनाश्रयचाक्षुष
त्वादेः परिमाणादिचाक्षुषत्वादिप्रयोजकत्वकल्पनानुवस्तुतस्तुकारण
तावच्छेदकस्यपूर्वसत्तायोजनपेक्षितत्वेनद्रव्यग्रहसमकालंपरिमाणादिग्रहो
नानुपपन्न इत्यभिधानेपिनक्षतिः अथपीतत्वादिभिरूपैरुत्वादिसं
कर्यप्रसंगात्। उद्भूतत्वेपीतत्वादिव्याप्यत्वनानैववाच्यं। तथा च व्यभिचारात्
5 कुतोहेतुहेतुमद्भा वः अत्राहुः। वस्तुतः पीतत्वादिव्याप्येनतत्तदु त्वो
द्भूतत्वेनहेतुतापीतादिचाक्षुषत्वेनउष्णादिस्पर्शनत्वादिनाच
द्भू

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कार्यतानैवमाकाशादेश्चाक्षुषादिकं न निरस्येत। द्रव्यचाक्षुषस्पार्शनयोः रू-
पत्वस्पर्शत्वादिभ्यां सामान्यतोऽपि कार्यकारणभावात्। विशेषसामग्रीसहितायाः
एव सामान्यसामग्र्याः कार्यजनकत्वाभ्युपगमात्। विशेषसामग्रीरहितस्य
गगनादेश्चाक्षुषाद्ययोगात्। ननु शीतादिद्रव्यस्पार्शनं प्रतिशीतादि-
व्यक्तितोद्भूतत्वस्य प्रयोजकत्वे कुतो वायोरप्रत्यक्षता। वायुस्पार्शनत्ववायुस्पा-
र्शगतोद्भूतत्वाभ्यां कार्यकारणभावस्य गौरवेणासिद्धेः। न चानुष्णाशीतस्पा-
र्शनप्रत्यनुष्णाशीतस्पर्शगतोद्भूतत्वेन हेतुत्वं लाघवेन पृथिवीस्पार्श- ५
नत्वेनैव तज्जन्यतावच्छेदकत्वात्। अनुष्णाशीतस्पर्शमात्रे एकस्योद्भूतत्व-
स्यासिद्धेः। कठिनादिस्पार्शनत्वकठिनागतोद्भूतत्वाभ्यामेव कार्यकारण

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भावाज्ञा अन्ये आहुः। वायुस्पर्शग्रामीस्यनुभवाद्बाधकर -- द्वयोरध्यक्षसिद्धौ
वायुस्पर्शितो द्भूतत्वाभ्यामपि कार्यकारणभावः कल्प्यते। न चाति- क्लृप्तै
तुहेतुमद्भावक ल्पनागौरवमेव बाधकं प्रमाणं वतो गौरवस्यादोषत्वात्
। अन्यथा जलादेरपि स्पार्शनविलोपापत्तिः स्यात्। मणिकृतस्तु पीतद्रौ
त्वादिव्याप्यं नानैवानुद्भूतत्वजातिस्तत्तदभावसमुदाय एव रूपादावनुद्भूत
त्वं स चानुगत एवेति प्राहुः। तत्रेदं विचार्यते। तत्तदनुद्भूतत्वाभावानां वि
शेषणविशेष्यभावे विनिगमकाभावादनन्तहेतुहेतुमद्भावस्त्वापत्तिऽ
6 र्विरे गौरवं पुनरधिकं। अथ चाक्षुषत्वाद्यवच्छिन्नं प्रति तत्तदनुद्भूतत्वा
भावविशिष्टरूपत्वादिनाऽन्यथा प्रत्यगेव हेतुनाकारणानां समाजा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

८

वाप्र

कार्योत्पत्तिं न तदुद्भूतत्वजातिविशेषपीतचाक्षुषत्वाभ्यां हेतुहेतुमद्भावः। अनं
तकोटिपीतरूपादिघटितत्वेन कार्यतावच्छेदकस्य गुरुत्वादिमणिकृतामपि प्रा
यादिति चेन्न वैशिष्ट्यविषया कारणतावच्छेदके ततोप्यधिकाधिकव्यक्तीनां प्र
वेशात्। किञ्च रूपत्वविशिष्टानुद्भूतत्वाभावेनानुद्भूतत्वाभाववद्विशिष्टरूपत्वे
न च हेतुत्वविनिगमनाभावात्। न तथा चातिगौरवमिति। अनुद्भूतरूपादे
पीतत्वादिषु मानाभावात्। पीतत्वादिव्यापकमेवोद्भूतमित्यपि नैतद्देवशो
मते। यद्विशाकरूपादिजन्यतावच्छेदकजातिभ्यां मसंकरः। तातचरणा
स्त्वाउद्भ्रमानसेतरजन्यसाक्षात्कारत्वावच्छिन्नप्रतिजनकतावच्छेदक
यातन्त्रस्यैकत्वगतमुद्भूतत्वमेव जातिः सिध्यति लाघवात्। नतुपरिम

८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ण गतं महत्त्वादिजन्यतावच्छेदकजातिभिः संकरात्। नापि पृथक्त्वगतं। तस्या वधि
ताप्यत्वेन विलंबोपस्थितिकत्वात्। तत्र च बहूनां विवादाच्च। अत एव न परत्वापरत्व
गतं तच्छून्यस्यापि द्रव्यस्योपगमात्। एकत्र परत्वापरत्वानां भूयसां च सत्त्वाच्च
। अत एव न द्वित्वादिगतं। न वा वेगादिभागगतमिति। कर्मादिजन्यतावच्छेदकजा
तिभ्यां संकराच्च। अत एव न संयोगगतं। एकत्र बहुषु संयोगेषु तत्कल्पने गौरवाच्च
। नापि स्थितिस्थापकगतं। तस्यातीन्द्रियत्वेन विलंबोपस्थितिकत्वात्। कैश्चित् पृ
थिव्यामेव तत्स्वीकारात्। बहूनां तत्रापि परिवादाच्च। नापि कर्मगतं नोदनादिजन्य
तावच्छेदकजातिभिः संकरात्। निष्क्रियस्यापि द्रव्यस्योपगमादेकत्र बहूनां कर्मणां
तत्कल्पने गौरवाच्च। इत्थं च वाय्वेकत्वे तज्जातिसत्त्वे वायोश्चाक्षुषापत्त्या तज्जाति
रहितमेव तदेकत्वं वाच्यमिति तस्यार्ग्नोपि वायुः। न चैवं प्रभापि न चाक्षुषी स्यात्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

७

तदेकत्वस्यानाहार्यज्ञातिरहितत्वादन्यथातस्याःस्पार्शनतापत्तिरितिवाच्यंऽद्भूतत्वा
न्यायदिश्यमानसेतरत्वविशिष्टजन्यद्रव्यसाक्षात्कारत्वेनजन्यद्रव्यसाक्षात्कारत्व
विशिष्टमानसेतरत्वादिनावाजन्यत्वमित्यत्रविनिगमकाभावे विभाव्यतेविम
व्यतांतर्हिचाक्षुषत्वस्पार्शनत्वव्यक्तादृशैकत्वजन्यतावच्छेदकंतथालाघवात्
तथापिनप्रत्यक्षोवायुः॥ अथलाघवाज्जन्यद्रव्यसाक्षात्कारत्वेनैकेनैवधर्
मेणतादृशैकत्वजन्यतावच्छेदकात्वायुरात्मापिनप्रत्यक्षःस्यात्॥ आत्मनस्ता
दृशैकत्वरहितत्वादन्यथाचाक्षुषापत्तेरितिचेन्न। जन्यत्वेसतिद्रव्यसाक्षा
कारत्वेनद्रव्यसाक्षात्कारत्वेसतिजन्यत्वेनकार्यतेत्यस्यविनिगमकाभावे [illegible] ७
वाच्य। द्रव्यचाक्षुषत्वस्पार्शनत्वाभ्यामेवजन्यतावच्छेदकत्वे [illegible] निरुक्ते

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्तिदधर्मोपिजन्यतावच्छेदकः कार्यतावच्छेदकं कार्यमात्रवृत्त्येवेस्यस्याप्रयो
जकत्वादितिविभाव्यतेतदाद्रव्यसाक्षात्कारत्वेनेवतादृशशोकतायालाघवे
नावच्छेदात्। वासुरात्मापिनलौकिकएवेतिवदंति। शोभनत्वेदमनुद्भूतरू
पादिकमंगीकुर्वतांमतेवस्तुतस्तत्रमानाभावात्। द्रव्यत्वस्यैवपृथिवीत्वादे
रप्रयोजकत्वात्। रूपाद्यसाधकत्वान्नो रूपादिकंइंद्रियादिकमितिरूप
त्वद्रव्यचाक्षुषत्वाभ्यांस्पर्शनत्वद्रव्यस्पार्शनत्वाभ्यामेवहेतुहेतुमद्भावः
एकत्वनिष्ठोद्भूतत्वकल्पनेगौरवात्। कार्यकारभावद्वयस्यतथाप्यावश्य
कत्वात्। किंचैतादृशशोकत्वमेवक्वचिज्जायतेक्वचिन्नजायतेत्यत्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विनिगमनाभावः। अवयवतादृशैक — मिति चेत्सुतरां गौरवं अत एव
द्रव्यसाक्षात्कारत्वेन नित्यसाधारणैकत्वजत्वपक्षोऽपि निरस्तः। अ
पि च द्वित्वादिकमपेक्षाबुद्धिजन्यतामेकत्वासमवायीकारणकं स्वजनका
पेक्षाबुद्धिनाशमिति जरन्नैयायिकनते मास्तु द्वित्वादावुद्भूतत्वमस्मा
कं तु द्वित्वादिकमाश्रयोत्पत्त्यनन्तरमेव समुत्पद्यते आश्रयनाशादेव न
श्यतीति तत्रैकत्ववदुद्भूतत्वकल्पने विनिगमकाभावः अपि च अवधि
विशिष्टपृथक्त्वज्ञानं प्रत्येवावधिहेतुत्वाभ्युपगमेन विनाप्यवधिज्ञानं पृ
थक्त्वग्रहात्। पृथक्त्वसाक्षात्कारमात्रे अवधीहेतुत्वकल्पनेऽपि तादृ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शाविलंबापस्थितेः कारणत्वगतत्वपरिपंथित्वेमानाभावात्। इयत्केः
पितत्कल्पनंदुर्वारं अथद्रव्यत्वमेवनास्तिगुणादाविवान्योन्याभावे
नैवद्रव्यत्वव्यवहारोपपत्तेरितिचेत्तर्हिएकत्वमपिनिखिलद्रव्यगतमे
कमेवएकस्मिन्ननुगतमतेरितिकथंतत्रोद्रव्यत्वकल्पनाप्रसंगोपीतिस्वयं
विभाव्यं। किंचवायोरप्रत्यक्षत्वेऽस्पार्शनेवायोरनुमितिः स्मरणंवावाच्यं
तथाचानंतकोटिनतज्ञानतत्प्रागभावध्वंसकल्पनापेक्षयाऽवे
9 चाक्षुषस्पार्शनेनप्रतिरूपस्पर्शयोरद्भुतत्वादिनापिहेतुत्वकल्पने
मेवज्यायः। नचतत्रापिवायुसाक्षात्कारकल्पनमितिसमानोर्थः प्रयोग
स्पर्शविषयकसाक्षात्कारस्यैववायुविषयकत्वस्वीकारात्तूपराम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ष्ठानुमित्योरुद्देश्यकस्य स्यात्। तत्तद्व्यक्तित्वेनैव कार्यकारणभाव इति। प्र
तिपादितमन्यत्र। तथा चानन्तकोटिकार्यकारणभावत्त्वाप्यावश्यक इति
लाघवादुद्भूतरूपत्वादिना वा हेतुत्वमुचितमित्यलमतिपी[illegible]ड्या। रू
पादिगतमेकैकमेवोद्भूतत्वं लाघवात् प्रमाणसिद्धं वसाकर्यस्यादोषत्वादितु
द्भूतरूपत्वस्य चाक्षुषत्वाभ्यामेव हेतुहेतुमद्भाव इत्यपि वदन्ति। इत्थं च रूप
दिगतं स्पार्शादिगतं चैकमेवोद्भूतत्वं कल्पयितुमुचितं उभयसाक्षात्कारत्वा
वच्छिन्नं प्रति उद्भूतरूपत्वेन लघुनो हेतुत्वस्य निर्वाहादिति। वायुरात्मा च न
प्रत्यक्ष इत्यपरे। नव्यास्तु उद्भूतरूपस्पर्शाभियवदन्यान्यत्वेन रूपस्पर्शाभि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यवदान्यत्वेन वाप्रतियोग्यविशेषितेनाखंडेनैंद्रियसाक्षात्कारेत्वावच्छिन्नं प्रति
हेतुत्वकल्पनाद्वा पुरात्मा च न प्रत्यक्षः। अनुमित्यादावपि तत्तदन्यतमत्वेन हे
तुत्वान्न तत्स्पर्शीयं तत्तज्जन्यानुमित्यारैक्तिहेतुहेतुमद्भावकल्पनेति वदंति। त्र
नंत तत्तदनुमित्यादिकल्पनापेक्षया ऽतिरिक्तरूपत्वस्य चाक्षुषत्वाभ्यां स्प
र्शत्वद्रव्यस्पार्शनित्वाभ्यां कार्यकारणभावद्वयकल्पनेनैव लघीयसी। अनुद्
तरूपादेः संकीर्णजातेश्चाभ्युपगमेऽनुद्भूतरूपस्पर्शत्वहेतुतावच्छेदके इति विशेषः

अनुद्भूतस्पर्शरूपजाते रसांकस्यैर्ये चोपगमेपीति चाक्षुषत्वोद्भूतरूपत्वा
भ्यां कार्यकारणभावकल्पनमपि ततो लघीय एव। कारणत्वतदवच्छेद
कत्वादीनां स्वरूपसंबंधादिरूपाणां क्लृप्तत्वादेव पदार्थांतरत्वमधिकं प्रतिव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्वात्। वस्तुतोऽनुद्भूतपीतत्वाभ्युपगमेपि उद्भूतपीताद्यन्यान्यत्वेन द्रव्यचा
१० क्षुषं प्रति उद्भूतरूपत्वेनान्यान्यत्वेन तु न द्रव्यस्पार्शनं प्रति हेतुनेति रूपमेव
कार्यकारणभावे। चाक्षुषत्वावच्छिन्नं प्रति यावंति चाक्षुषाणि तावदन्या
न्यत्वेन स्पार्शनत्वावच्छिन्नं प्रति यावंति स्पार्शनानि तावदन्यान्यत्वेन हेतुत्वे
त्वत्र एव गुरुत्वादेरसादेश्च न चाक्षुषस्पार्शनयोरेकेन रूपेण हेतुत्वे रूपस्पर्श
योः स्पार्शनचाक्षुषे स्यातामिति विभिन्नरूपेण हेतुत्वावश्यकतात तथा च ना १०
धिककार्यकारणभावकल्पनेति वायुरात्मा च प्रत्यक्षएवेति परमार्थः॥ ॥
समस्तशास्त्रार्थकल्पाविधिज्ञैर्विज्ञैः स्वपक्षप्रकटप्रवीणैः। कार्योनवीनैस्सुकृती
विचारः श्रीरामभद्रेण च वायुवादः॥ इति श्रीरामभद्रेणरचितो वायुवादार्थः समाप्तः॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham